# 6th Semester 3rd Year, AHSNS-602C-14, Sanskrit & World Literature, Note – 1

## प्रश्नः 1. विश्वसंस्कृतसाहित्ये म्याक्समुलार्-महोदयस्य अवदानम्। (F.M-10)

**<u>उत्तरम् -</u>** पाश्चातेषु संस्कृतपण्डितेषु संस्कृतसाहित्य अविस्मरणीयं भवति म्याक्समुलार्-महोदयः। अयं पण्डितः जार्मान् नगरे 1823 खीष्टाब्दस्य दिसेस्वरमासस्य 6 दिनाङ्के योनिमलभत्। संस्कृतपरिवारे अस्मिन् तस्य पितुः नाम उइलहेलम्, सः सङ्गीतज्ञः गीतिकारश्च आसीत्। माता च आदेलहेड् मुलार्, सा आसीत् राजनैतिकमन्त्रीणः कन्या। तस्य पत्नी आसीत् जर्जिना एडिलेइड्। म्याक्समुलार-महोदयस्य जन्म यद्यपि जार्मान् नगरे आसीत् परन्तु शिक्षाजीवनं कर्मजीवनं च यापितं इंलन्ड नगरे।

तदानीं काले षड्-वर्षीयः अयं महोदयः देसाओ नगरे जिमनसियाम् नामक कश्चन व्याकरण-विद्यालये प्रवेशं स्वीकृतवान् आसीत्। अनन्तरं 1839 खीष्टाब्दे पितामहस्य परलोकगमनान्तरं लिपजिग नगरे निकोलाइ-विद्यालये सङ्गीते ध्रुपदी-साहित्ये च पठनं प्रारद्धवान्, तदानीं काले तत्र फेलिक्स-मेण्डेलेन साकं प्रतिदिनं साक्षात्कारो भवति स्म।

छात्रवृत्रेः प्रयोजनार्थं सः विद्यालये पठनं समाप्य लिपजिग-विश्वविद्यालये पठनं प्रारद्धवान्, तत्र गणितविषये, आधुनिकभाषाविषये, विज्ञानविषये ज्ञानम् अर्जितवान्, संगीते पद्यकाव्ये च इच्छा आसीत् परन्तु कालान्तरे भाषाविद्याविषये अनुरागः उदितः आसीत्। 1841-43 खीष्टाब्दे नीतिशास्त्रस्य उपरि गवेषणां कृतवान्, क्रमेण ग्रिक्, ल्याटिन्, आरवि, फार्सि, संस्कृतभाषायां च तस्य गभीरज्ञानं प्रस्फुटितम् आसीत्।

तेषां कर्मजीवनं एवं दृश्यते, 1850 खीष्टाब्दे अक्सफोर्ड-विश्वविद्यालये इउरोपीयभाषायाः अध्यपकरूपेण पदम् अलङ्कृतवान्। परस्मिन् वर्षे एव विश्वविद्यालयस्य क्राइस्ट चार्च इत्यस्य सदस्यरूपेण पदं प्राप्तवान्। 1854 खीष्टब्दे अल् सोलस् महाविद्यालयपक्षतः आजीवनवृत्तिरूपेण तेषां निर्वाचनं जातम्। अनन्तरं परस्मिन् काले अक्सफोर्ड-विश्वविद्यालयस्य दर्शनशास्त्रस्य अध्यापकरूपेण पदं प्राप्तवान्। आमृत्युपर्यन्तं ते ससम्मानेन भूषिताः आसन्।

1844 खीष्टाब्दे अक्सफोर्डविश्वविद्यालये कर्मजीवनस्य प्रारम्भात् प्राक् बार्लिन् प्रदेशे फ्रड्रिक शेलिं-महोदयेन सह अध्ययनकाले सः शेलिं महोदयस्य प्रेरणया उपनिषदः अनुवादं प्रारम्भितवान्।परवर्तीकाले तेन इन्द-इउरोपीय-पण्डितस्य फ्राङ्कमहोदयस्य अधीने गवेषणां कृतवान्। तदानींकाले सम्पूर्णग्रन्थस्य हितोपदेशस्य जार्मानभाषायम् अनुवादं कृतवान्।

1845 खीष्टाब्दे इउलिन्-वार्ण-उफ-महोदस्य अधीने संस्कृतस्य ज्ञानाय प्यारिस-नगरं प्रति गतवान्। वार्ण-उफ-महोदय इंल्याण्डप्रदेशे प्राप्तस्य पाण्डुलिपेः प्रकाशनाय म्याक्समूलार्-महोदयं उत्साहितवान्। अनन्तरं 1846 खीष्टाब्दे सः संस्कृतस्य अध्ययनाय इष्ट-इन्डिया-कोम्पानी इत्यस्य संग्रहशालायां गतवान् आसीत्। ततः अक्सफोर्ड-विश्वविद्यालये भारतीय-संस्कृतेः भाष्यकाररूपेण स्थानं प्राप्तवान्। तस्य साहाय्येन एव भारतीयसंस्कृतेन सह वैदेशिकसंस्कतेः मेलबन्धनं प्रारम्भमासीत्। परं च राममोहनराय-महोदयस्य वङ्गीय-ब्राह्मसमाजेन सह सम्पर्कः आसीत्।

मूलार् महोदयस्य दार्शनिकः तथा भाषातत्त्वविदः आसीत्। तेषां गवेषणापत्रेण इत्थम् अनुमीयते यत् – भारतीयवैदिकसंस्कृतिः इउरोपीयशास्त्रीय- संस्कृतेः प्राचीनतम। न केवलं वैदिकभाषायाम् अपि तु संस्कृतापेक्षया अपि वैदिकसंस्कृतिः प्राचीनतमः। संस्कृताय सः आजीवनं समर्पितवान्, अतः समकालीनपण्डितेषु तदानींकाले सैव अन्यतमः आसीत्। तस्य विश्वासः एवमासीत् यत् – इउरोपायधर्मीयाणां संस्करणाय धर्मीयविश्वासाय च वैदिकप्राचीनसंस्कृतेः अध्ययनं आवश्यकम्। वैदिकशास्त्राणां तथा ऋग्वेदस्य सम्यक् रूपेण अध्ययनेन तस्य मर्मार्थः तेन अनुभूतः। तस्मिन् समये

भारतस्य विवेकेन तथा वेदान्तज्ञानस्य अवतारेण सह साक्षात्कारः अभवत्, ततः गुरुदेवस्य परमहंसस्य रामकृष्णस्य कर्मेण प्रेरितः आसीत्। तदन्तरं एतयोः महापुरुषयोः विषये पुस्तकरचनाम् अपि कृतवान्।

मूलार-महोदयस्य संस्कृतप्रेमः सर्वजनविदितं, वैदिकसंस्कृते तस्य आसक्तिः अस्मान् बहुवारं प्रेरयति। तेन वैदिकदेवतानां विभाजनं तेषां वर्णना अपि च देवतानाम् उत्पत्तेः कथारचना स्वयमेव निर्मितवान् आसीत्।

मूलार्-महोदयस्य कर्मजीवने हिन्दुधर्मस्य संस्कारेण सह ख्रीष्टधर्मस्य तुलनायाः प्रयोजनम् अनुभूतवान्। कुसंस्कारस्य तथा मूर्तिपूजायाः तेन विरोधं कृतवान्। तेषां मते भारतीयसंस्कृतिः तथा शिक्षा च स्वादरणीयम् सर्वदा। 1883 ख्रीष्टाब्दे केम्ब्रीज्-विश्वविद्यालयस्य भाषणे भारतस्य प्राचीनसंस्कतेः महत्वं उच्चशिखरे स्थापितवान्।

सम्मानविषये उच्यते चेत् –

सः स्मरणीयकर्मजीवने बहु सम्माने भूषितः आसीत्।

1. 1869 ख्रीष्टाब्दे मूलार् फरासि अकादेमी देस शिलालिपिः तथा च वेलेस् लेट्रेस् वैदेशिकसंवाददाता।
2. 1874 ख्रीष्टाब्दस्य जुन मासि पोर-ले-मेराट् (Civil Class) इति।
3. 1875 ख्रीष्टाब्दे विज्ञानस्य कृते तथा शिल्पाय च Bavarian म्याक्सिमिलियान् निर्देशः तेन प्राप्तः।
4. 1896 ख्रीष्टाब्दे मूलार् महाराणी-भिक्टोरिया-महोदयया प्रिभि काउन्सिल् इति पदस्य सदस्य रूपेण नियुक्तः आसीत्।
5. प्रुशिया तथा इतालिनगरसर्वकारीय नाइट् सम्मानेन भूषितः आसीत्।

**<u>ग्रन्थप्रकाशनम्</u>**

तेषां पाण्डित्यपूर्णप्रकाशेषु अष्टादश खण्डे "Collected Works" इति पुस्तकस्य पृथकरूपेण प्रकाशनम्, तेषु एकादश भवन्ति संस्कृतस्य विषये।

ते भवन्ति –

1. ऋग्वेदः (सायणभाष्यसहितः) षट् खण्डाः (1849-73)।
2. जार्मान्भाषायं हितोपदेशस्य अनुवादः, 1844।
3. जार्मान्भाषायां मेघदूतस्य अनुवादः, 1847।
4. ऋग्प्रातिशाख्यस्य जार्मान्भाषायाम् अनुवादः, 1859-69।
5. उपनिषदः अंलोभाषायाम् अनुवादः, 1879।
6. प्राचीन-भारतीय-संस्कृस्य इतिहासः (A HISTORY OF ANCIENT SANSKRIT LETERATUTE), 1859।
7. A SANSKRIT GRAMMER.
8. INDIA-WHAT CAN IT TEACH US? 1893.
9. आपस्तम्भसूत्रस्य अंलोभाषायाम् अनुवादः, 1890.
10. THE SIX SYSTEM OF HINDI PHILOSOPHY, 1894.
11. THREE LECTURE ON VEDANTA PHILOSOPHY, 1898.

**<u>उपसंहारः</u>**

सर्वजनविदितः म्याक्समूलार्-महोदयः भारतविशारदः, दार्शनिकः, धर्मतत्त्वविदः, समाजतत्त्वविदः, भाषातत्त्वविदः, अध्यापकः, जार्मान्पण्डितः, अनुवादकः आसीत्। भारतीयप्राच्यविद्या प्रचाराय तेषां गुरुत्वम् अविस्मरणीयम्। जीवनस्य अन्तिमभागे संस्कृतवैदिकवाङ्मयस्य उपरि बहु कृतित्वम् अर्जितवान्। पाश्चात्यरीत्यानुसारेण वैदिकज्ञानाय च म्याक्समूलार् महोदयस्य ऋग्वेदस्य व्याख्या अतीव महत्त्वपूर्णम्। भारतस्य माहात्म्यम् "INDIA-

WHAT CAN IT TEACH US? " इति पुस्तके प्रस्फूटितम्। पुस्तकमिदं पञ्चमवेदत्वेन, तथा सप्तमवेदत्वेन, वेदान्तपुस्तकरूपेण स्थानं अधिकरोति। न केवलं भारतीयहिन्दुधर्मविषये अपि च बौद्धधर्मविषये इपि निदर्शनं परिलक्ष्यते। अयं क्षणजन्मामनीषी तथा भारतप्रेमिकः भारतस्य प्रति तस्य गभीरप्रेमः आसीत् परन्तु स्वदेशे प्रत्यागमनात् परं कदापि भारतं प्रति नैव आगतवान्, वस्तुतः तदानींकाले ब्रीटिश्-सर्वकारस्य तथा नियमः आसीत् यत् वैदिशिकानां भारते पुनः आगमनं निषिद्धम् इति। एतादृशः महामानवः ब्रीटिशनागरिकः यद्यपि वैदेशिकः तथापि मनसा भारतीयरूपेण संस्कृतप्रेमिकः अक्सफोर्डनगरे दिवं गतवान्। "